तरनक्षत्रयुक्तपौर्णमास्याम् ज्येष्ठ्येव स्वार्थे अण् ङीप् । २गृहगोधिकायाञ्च । वल्लीशब्दे दृश्यम् ।

**ज्यैष्ठिनेय** पुंस्त्री ज्येष्ठायाः स्त्रियाः अपत्यम् ढक् इनङ् । ज्येष्ठाया अपत्ये । "ज्येष्ठो ज्यैष्ठिनेयः स्तुवीत" ता० ब्रा०२।१।२। "कृते कानिष्ठिनेयस्य ज्यैष्ठिनेयो विवासितः" भट्टिः ।

**ज्यैष्ठ्य** न० ज्येष्ठस्य भावः ष्यञ् । १श्रेष्ठत्वे २वयसा अग्रजत्वे च ।"विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणान्तु वीर्य्यतः । वैश्यानां धान्यधनतः शूद्राणामेव जन्मतः" मनुः

**ज्यो** नियमे उपनये व्रतोपदेशे च भ्वा० आत्म०सक० अनिट् । ज्यवते अज्यास्त । जुज्ये ।

**ज्योक्** अव्य०ज्यो–बा० उकुन् । १कालभूयस्त्वे २प्रश्ने ३शीघ्रार्थे ४सम्प्रत्यर्थे शब्दार्थचि०५उज्ज्वलत्वे च "सर्वमायुरेति ज्योग् जीवति महान् प्रजया पशुभिर्भवति" छा० उ० "ज्योगुज्ज्वलं जीवति" भा० ।

**ज्योतिरात्मन्** पु० ज्योतिरात्माऽस्य । सूर्य्यादौ "यथाह्ययं ज्योतिरात्मा विवस्वान्" श्रुतिः ।

**ज्योतिरादित्य** पु० ज्योतिषि सावित्रे मण्डले आदित्यः । परमेश्वरे "आदित्यो ज्योतिरादित्यः" विष्णुस०

**ज्योतिरिङ्ग** पु० ज्योतिरिव इङ्गति इगि–गतौ अच् । खद्योते शब्दरत्ना०युच् । ज्योतिरिङ्गणोऽप्यत्र अमरः।

**ज्योतिर्गणेश्वर** पु० ज्योतिर्गणानामीश्वरः । १परमेश्वरे "स्कन्दः साङ्गः शतानन्दो नन्दिज्योतिर्गणेश्वरः" विष्णुसं०। "तमेव भान्तमनुभाति सर्वम् तस्य भासा सर्वमिदं विभाति" इति श्रुत्या तस्यैव सर्वज्योतिर्गणानामवभासनस्य प्रतिपादनात्तथात्वम् । [ग्रन्थः । ज्योतिःशास्त्रे ।

**ज्योतिर्ग्रन्थ** पु० ज्योतिषां ग्रहनक्षत्रादीनां गत्यादिसाधनं

**ज्योतिर्मय** त्रि० ज्योतिरात्मकः प्राचुर्य्ये वा मयट् । १ज्योतिरात्मके ज्योतिःस्वरूपे २ज्योतिःप्रचुरे च । "क्षपोन् ज्योतिर्मयान् सप्त सस्मार स्मरशासनः" कुमा० "न भौमान्येव धिष्ण्यानि हित्वा ज्योतिर्मयान्यपि" रघुः ।

**ज्योतिर्विद्** पु०ज्योतिषां सूर्य्यादीनां गत्यादिकं वेत्ति विद्–क्विप् । ज्योतिःशास्त्राभिज्ञे । "दृष्ट्वा ज्योतिर्विदो वैद्यान् दद्याद्गां काञ्चनं महीम्" याज्ञ० । ज्योतिर्विदाभरणम् ।

**ज्योतिर्विद्या** स्त्री ज्योतिषां सूर्य्यादीनां गत्यादिज्ञानसाधनं विद्या । ज्योतिःशास्त्रे । [ १खद्योते त्रिका० ।

**ज्योतिर्वीज** न० ज्योतिषो गगने प्रकाशस्य वीजमिव ।

**ज्योतिर्लोक** पु० ज्योतिषां लोकः आश्रयः । कालचक्रप्रवर्त्तकध्रुवलोके २तदधिपे परमेश्वरे च तल्लोकस्थितिवर्णनं भाग०५।२३ अ० ।

"अथ तस्मात् परतस्त्रयोदशलक्षयोजनान्तरतो यत्तद्विष्णोः परमं पदमभिवदन्ति । यत्र महाभागवतो ध्रुव औत्तानपादिरग्निनेन्द्रेण प्रजापतिना कश्यपेन धर्म्मेण च समकालयुग्भिः सहबहुमानं दक्षिणतः क्रियमाण इदानीमपि कल्पजीविनामाजीव्य उपास्ते तस्य महानुभाव उपवर्णितः । सहि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनाम् अनिमिषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुरिवावष्टम्भ ईश्वरेण विहितः शश्वदवभासते । यथा मेधीस्तम्भ आक्रमणपशवः संयोजितास्त्रिभिः सवनैर्यथास्थानं मण्डलानि चरन्ति । एवं भगणा ग्रहादय एतस्मिन्नन्तर्बहिर्योगेन कालचक्र आयोजिता ध्रुवमेवालम्ब्य वायुनोदीर्य्यमाणा आकल्पान्तं परितः क्रामन्ति । नभसि यथा मेघाः श्येनादयो वायुवशाः कर्म्मसारथयः परिवर्त्तन्ते । एवं ज्योतिर्गणाः प्रकृतिपुरुषसंयोगानुगृहीताः कर्मनिर्मितगतयो भुवि न पतन्ति । केचिदेतत् ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयन्ति । यस्य पुच्छाग्रेऽवाक्शिरसः कुण्डलीभूतदेहस्य ध्रुव उपकल्पितः तस्य लाङ्गूले प्रजापतिरग्निरिन्द्रो धर्म इति । पुच्छमूले धाता विधाता च कट्यां सप्तर्षयः यस्य दक्षिणावर्त्तकुण्डलीभूतशरीरस्य यान्युदगयनानि दक्षिणपार्श्वे नक्षत्राणि उपकल्पयन्ति । दक्षिणानि तु सव्ये यथा शिशुमारस्य कुण्डलाभोगसन्निवेशस्य पार्श्वयोरुभयोरप्यवयवाः समसंख्या भवन्ति । पृष्ठे त्वजवीथी आकाशगङ्गा चोदरतः । पुनर्वसुपुष्यौ दक्षिणवामयोः श्रोण्योरार्द्राश्लेषा च दक्षिणवामयोः पादयोरभिजिदुत्तराषाढ़े दक्षिणवामपार्श्वयोर्नासिकयोर्यथासंख्यं... दक्षिणवामपार्श्ववध्रिषु युञ्जीत । तथैव मृगशीर्षादीन्युदगयनानि दक्षिणपार्श्वे प्रातिलोम्येन प्रतियुञ्जीत । शतभिषाज्येष्ठे स्कन्धयोर्दक्षिणवामयोर्न्यसेत् । उत्तराहनावगस्त्यः अधराहनौ यमः मुखे चाङ्गारकः शनैश्चर उपस्थे बृहस्पतिः ककुदि वक्षस्यादित्यो हृदये नारायणो मनसि चन्द्रो नाभ्यामुशनास्तनयोरश्विनौ बुधः प्राणापानयोराहुर्गले, केतवः सर्वाङ्गेषु, रोमसु सर्वे तारागणाः । एतदु हैव भगवतो विष्णोः सर्वदेवता-